SET – 4

Series : HRK/C

कोड नं.
Code No. **52**

रोल नं.
Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# सङ्कलनात्मकं मूल्याङ्कनम् - II

## SUMMATIVE ASSESSMENT - II

## (संस्कृतम्)

## SANSKRIT

*अवधिः : होरात्रयम्* | *पूर्णाङ्काः : 90*

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 90*

*Time allowed : 3 hours* | *Maximum Marks : 90*

| | | |
|---|---|---|
| खण्डः क : | अपठितांश-अवबोधनम् (अपठितांश अवबोधन) | 15 अङ्काः |
| SECTION A : | Unseen Reading Comprehension | |
| खण्डः ख : | रचनात्मककार्यम् (रचनात्मक-कार्य) | 15 अङ्काः |
| SECTION B : | Writing Skills | |
| खण्डः ग : | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण) | 30 अङ्काः |
| SECTION C : | Applied Grammar | |
| खण्डः घ : | पठित-अवबोधनम् (पठित-अवबोधन) | 30 अङ्काः |
| SECTION D : | Reading Comprehension | |

निर्देशाः

**Instructions :**

*(i)* *अस्मिन् प्रश्नपत्रे* ***चत्वारः*** *खण्डाः सन्ति ।*
*इस प्रश्न-पत्र में* ***चार*** *खण्ड हैं ।*
*The question paper has* ***four*** *sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे ।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी ।*
*Write the question number according to the question paper.*

*(iv)* ***सर्वेषां*** *प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि ।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए ।*
*Answer* ***all*** *the questions in* ***Sanskrit.***

## खण्डः – क

## SECTION – A

### अपठितांश-अवबोधनम् (अपठितांश अवबोधन)

### Unseen Reading Comprehension **15 अङ्काः**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following passage and answer the given questions in Sanskrit.

अस्माकं परितः प्रसृतं वातावरणं पर्यावरणं कथ्यते । पर्यावरणप्रदूषणेन अस्माकं जीवनं शनैः शनैः रुग्णं भवति क्षयं च प्राप्नोति । पर्यावरणस्य रक्षा अस्माकं परमं कर्तव्यम् अस्ति । तस्य रक्षायै अस्माभिः विविधाः वृक्षाः रोपणीयाः । वृक्षाणां विनाशः दण्डनीयः अपराधः घोषयितव्यः । सर्वे प्रदूषणप्रसारपरा उद्योगाः नगरात् ग्रामाद् वा दूरे स्थापनीयाः । कर्मस्थलानाम् अवकरः नदीषु न पातनीयः । वाहनानां प्रयोगः न्यूनः कर्तव्यः । पर्यावरणस्य रक्षणेन एव अस्माकं रक्षा भविष्यति ।

**प्रश्ना :**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1 × 2 = 2**

(i) अवकरः कुत्र न पातनीयः ?

(ii) अस्माकं परमं कर्तव्यं किम् अस्ति ?

II. पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **2 × 2 = 4**

(i) पर्यावरणप्रदूषणेन किं भवति ?

(ii) नगरात् ग्रामात् वा दूरे के स्थापनीयाः ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. **½ × 4 = 2**

(क) 'भविष्यति' इतिक्रियापदस्य किं कर्तृपदम् अनुच्छेदे प्रयुक्तम् ?

(i) अस्माकम्

(ii) पर्यावरणम्

(iii) रक्षा

(iv) वृक्षाः ।

(ख) 'तस्य रक्षायै' इत्यत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(i) रक्षायै

(ii) वृक्षाय

(iii) जीवनाय

(iv) पर्यावरणाय ।

(ग) 'प्रदूषणप्रसारपरा:' इति विशेषणपदस्य विशेष्यपदं किम् ?

(i) उद्योगा:

(ii) वृक्षा:

(iii) ग्रामात्

(iv) स्थापनीया: ।

(घ) 'लभते' इतिक्रियापदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(i) अस्ति

(ii) प्राप्नोति

(iii) भविष्यति

(iv) कथ्यते ।

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत ।

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write the appropriate title for this passage in Sanskrit. **2**

2. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत ।

निम्नलिखित श्लोक को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए ।

Read the following Shloka and answer the given questions in Sanskrit.

**"अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**

**परोपकार: पुण्याय पापाय परपीडनम् ।।"**

**प्रश्ना:**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1 × 1 = 1**

पुराणेषु कस्य वचनद्वयम् अस्ति ?

II. पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **1 × 2 = 2**

(i) पुराणानि कति सन्ति ?

(ii) पुण्यं किं भवति ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the appropriate answer from the given options. **1 × 2 = 2**

(क) 'अपकार:' इतिपदस्य किं विलोमपदं श्लोके प्रयुक्तम् ?

(i) परपीडनम् (ii) उपकार:

(iii) वचनद्वयम् (iv) पुण्याय

(ख) 'दु:खप्रदानम्' इत्यर्थे किं पर्यायपदं श्लोके प्रयुक्तम् ?

(i) पीडनम् (ii) द्वयम्

(iii) अष्टादश (iv) पुण्याय

## खण्ड: – ख

## SECTION – B

## रचनात्मककार्यम् (रचनात्मक-कार्य)

## Writing Skills **15 अङ्का:**

3. अनुजं प्रति लिखितम् अध:पत्रं मञ्जूषापदसहायतया पूरयित्वा पुन: लिखत ।

अनुज को लिखे गए निम्नलिखित पत्र को मञ्जूषा में दिए गए शब्दों की सहायता से पूर्ण कर पुन: लिखिए ।

Complete the following letter written to your brother, with the help of the words given in the box and rewrite the same. **½ × 10 = 5**

(i) __________

(ii) __________

शुभाशिष: ।

अहमत्र (iii) ________ अस्मि । त्वम् अपि तत्र कुशली असि इति मन्ये । मातापितरौ त्वां सर्वदा (iv) ________ । तवाग्रजा आगामिसप्ताहे गृहम् (v) _______ । त्वम् अपि यदि (vi) ______ इच्छसि तर्हि आगच्छ । अस्मिन् विषये तवाग्रजा अपि त्वां पत्रं (vii) _______ । तव अध्ययनं (viii) _______ प्रचलति इति वयं चिन्तयाम: । अन्यत् सर्वं (ix) ________ । सर्वेभ्य: मित्रेभ्य: मदीया: शुभकामना : ।

तव (x) _______

श्रीनाथ: ।

**मञ्जूषा**

| |
|---|
| लेखिष्यति, वाराणसीत:, कुशली, सम्यक्, प्रिय अनुज !, |
| अग्रज:, आगमिष्यति, कुशलम्, आगन्तुम्, स्मरत: । |

4. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत ।
नीचे दिए गए चित्र का वर्णन मञ्जूषा में दिए गए शब्दों की सहायता से **पाँच** संस्कृत वाक्यों में कीजिए ।
Describe the following picture in **five** Sanskrit sentences with the help of the words given in the box below. **2 × 5 = 10**



**मञ्जूषा**

| |
|---|
| उद्यानम्, जलेन, विविधानि पुष्पाणि, वृक्षाः सिञ्चति, लता, चित्रपतङ्गाः, उद्यानरक्षकः, जलयन्त्रेण, हरितम्, सन्ति । |

**अथवा/OR**

मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य **पञ्चभिः** संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।

मञ्जूषा में दिए गए शब्दों की सहायता से निम्नलिखित विषय पर **पाँच** संस्कृत वाक्यों में एक अनुच्छेद लिखिए ।

Write a paragraph in **five** Sanskrit sentences on the following topic with the help of the words given in the box. **2 × 5 = 10**

**'अस्माकं विद्यालयः'**

**मञ्जूषा**

| |
|---|
| विद्यालयः, विशालं भवनम्, पुस्तकालयः, सन्ति, शिक्षकाः, पुरस्कारान् लभन्ते, पाठयन्ति, क्रीडाक्षेत्रम्, स्वच्छता, योग्याः, पठन्ति, छात्राः, प्रधानाध्यापकः, संस्कृतशिक्षकः । |

## खण्डः – ग

## SECTION – C

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

## Applied Grammar

**30 अङ्का:**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि अथवा सन्धिविच्छेद करके लिखिए ।

Write the underlined words of the following sentences after joining or disjoining Sandhis. **1 × 4 = 4**

(i) यदि + अपि सा बालिका तथापि तस्याः उत्साहः अतुल्यः ।

(ii) सर्वे जनाः जगन्नाथं प्रणमन्ति ।

(iii) ग्रामे + अस्मिन् एकं सुन्दरम् उद्यानमस्ति ।

(iv) अत्र कस्तिष्ठति ।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत ।

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए हुए विकल्पों में से चुनकर लिखिए ।

Choose and write the correct compounded or expounded forms of the underlined words in the following sentences. **1 × 5 = 5**

(क) शिशिरः च वसन्तः च पुनरायातः ।

(i) शिशिरवसन्ताः

(ii) वसन्तशिशिरः

(iii) शिशिरवसन्तौ ।

(ख) प्रतिहतान्तःकरणः सः अचिन्तयत् ।

(i) प्रतिहतकरणं यस्य सः

(ii) प्रतिहतम् अन्तः करणं यस्य सः

(iii) अन्तः करणः प्रतिहतम् ।

(ग) समयम् अनतिक्रम्य भोजनं करणीयम् ।

(i) यथासमयम्

(ii) अनतिक्रम्य समयेन

(iii) समयानुसारेण ।

(घ) पीतदुग्धा बालिका विद्यालयं गच्छति ।

(i) पीतं दुग्धं येन सः

(ii) दुग्धं पीतं यस्मिन् सः

(iii) पीतं दुग्धं यया सा ।

(ङ) रामः मृगस्य पश्चात् धावति स्म ।

(i) समृगम्

(ii) अनुमृगम्

(iii) मृगानुसारम् ।

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत ।

निम्नलिखित वाक्यों में प्रकृतिप्रत्ययों को जोड़कर या पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए ।

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below : **1 × 5 = 5**

(क) ग्रामं गम् + शतृ बालकः मोबाइलमाध्यमेन वार्तालापं करोति ।

(i) गमन्

(ii) गच्छसि

(iii) गच्छन्

(ख) परिश्रमस्य महत्त्वं सर्वे जानन्ति ।

(i) मह + त्वम्

(ii) महत् + त्व

(iii) महत् + वम् ।

(ग) कविना प्रकृतेः सुन्दर + तल् वर्णनं कृतम् ।

(i) सुन्दरतलायाः

(ii) सौन्दर्यस्य

(iii) सुन्दरतायाः ।

(घ) एषा मम पुत्री क्रीडति ।

(i) पुत्र + ङीप्

(ii) पुत्र + ईर्

(iii) पु + त्री ।

(ङ) गुरुं सेव् + शानच् छात्राः प्रसन्नाः सन्ति ।

(i) सेवमानः

(ii) सेवमानाः

(iii) सेवमानम् ।

8. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत ।

निम्नलिखित वाक्यों में रिक्तस्थानों की पूर्ति मञ्जूषा में दिए गए उचित अव्ययपदों के द्वारा कीजिए ।

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box. **1 × 5 = 5**

(i) कैलाशः अद्य _____ गमिष्यति ?

(ii) ग्रामात् _______ एका नदी प्रवहति ।

(iii) ______ परोपकारः क्रियते तावत् शरीरस्य उपयोगः ।

(iv) ध्वनिं _______ कुरु ।

(v) अहम् इदं कार्यं करिष्यामि _____ सः दृढतया अवदत् ।

**मञ्जूषा**

| |
|---|
| मा, कुत्र, इति, यावत्, बहिः । |

9. उचितसंख्यापदं चित्वा वाक्यानि पूरयत ।

उचित संख्यापद चुनकर वाक्य पूर्ण कीजिए ।

Choose the correct numerical words and complete the sentences. **1 × 5 = 5**

(i) वने ______ सिंहा: वसन्ति । (चत्वारि, चतस्रः, चत्वारः)

(ii) वानर:______ फलानि अखादत् । (तिस्र: त्रीणि, त्रय:)

(iii) जना: ______ नेत्राभ्यां पश्यन्ति । (द्वयो:, द्वाभ्याम्, द्वे)

(iv) अस्यां कक्षायां ______ छात्रा: पठन्ति । (विंशत्, विंशता:, विंशति:)

(v) ______ तडागे श्वेतकमलानि विकसन्ति । (एकस्मिन्, एकम्, एक:)

10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति । प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत ।

निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध है । दिए गए विकल्पों में से उचित उत्तर चुनकर अशुद्ध पद को संशोधित कर लिखिए ।

Choose the correct answer from the given options and correct the underlined incorrect word in the following sentences. **1 × 6 = 6**

(क) अस्मिन् पाठ्यपुस्तके दश पाठानि सन्ति ।

(i) पाठम् (ii) पाठै:

(iii) पाठा: (iv) पाठौ ।

(ख) ह्य: अहं वाराणसीं गमिष्यामि ।

(i) गमिष्याम: (ii) अगच्छम्

(iii) गच्छाव: (iv) अगच्छत् ।

(ग) ता: बालका: पठन्ति ।

(i) ते (ii) तौ

(iii) सा (iv) तानि ।

(घ) अहं नेत्रयो: पश्यामि

(i) नेत्रेषु (ii) नेतृभि:

(iii) नेत्राभ्याम् (iv) नेत्रम् ।

(ङ) उद्याने अनेका: जना: व्यायामं कुर्वन्ति ।

(i) अनेक: (ii) अनेके

(iii) अनेकेषाम् (iv) अनेकान् ।

(च) स: मम मित्र: अस्ति ।

(i) मित्राणि (ii) मित्रौ

(iii) मित्राभ्याम् (iv) मित्रम् ।

## खण्ड: – घ

## SECTION – D

## पठित–अवबोधनम् (पठित–अवबोधन)

## Reading Comprehension 30 अङ्का:

11. अधोलिखितं गद्यांशं, पद्यं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

निम्नलिखित गद्यांश, पद्य और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए ।

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit.

(अ) **गद्यांश:**

"अनेन वचसा प्रतिहतान्त:करण: प्रच्छन्नभाग्य: अचिन्तयत् 'किम् इदं वचनं माम् एव लक्ष्यीकरोति ? अहो कुमार्गम् आश्रित्य मम कीदृशी इयं क्लेशपरम्परा । गुरुपदेशेन इव अनेन बालवचसा मम चक्षुषी समुन्मीलिते । अद्य प्रभृति पापपथं त्यजामि' इति विचिन्त्य मित्रं दुष्टबुद्धिम् अवदत् – 'सखे ? यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान् ।"

**प्रश्ना:**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1**

'अद्यप्रभृति पापपथं त्यजामि' इति क: अचिन्तयत् ?

II. पूर्णवाक्येन उत्तरत ।

पूर्णवाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **1**

प्रच्छन्नभाग्य: दुष्टबुद्धिं किम् अवदत् ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the correct answer from the given options. **1 × 2 = 2**

(क) 'चक्षुषी' इति कर्तृपदस्य क्रियापदं किम् अस्ति ?

(i) लक्ष्यीकरोति

(ii) अवदत्

(iii) समुन्मीलिते

(iv) अचिन्तयत् ।

(ख) अनुच्छेदे 'पन्थानम्' इति विशेष्यपदस्य विशेषण किम् अस्ति ?

(i) पापपथम्

(ii) मित्रस्थानम्

(iii) कुमार्गम्

(iv) साधुजनगर्हितम् ।

(आ) <u>पद्यम्</u>

"य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च ।

न कुर्यादहितं कर्म स परेभ्य: कदापि च ।।"

**प्रश्ना:**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1**

मानव: कस्य श्रेय: इच्छति ?

II. पूर्णवाक्येन उत्तरत ।

पूर्णवाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **1**

परेभ्य: कदापि किं न करणीयम् ?

III. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the correct answer from the given options. **1 × 2 = 2**

(क) 'कुर्यात्' इति क्रियापदस्य कर्तृपदं किमस्ति ?

(i) कर्म

(ii) य:

(iii) स:

(iv) आत्मन: ।

(ख) 'कल्याणम्' इत्यर्थे श्लोके किं पदं प्रयुक्तम् ?

(i) प्रभूतानि

(ii) सुखानि

(iii) श्रेय:

(iv) अहितम् ।

(इ) नाट्यांशः

"पर्यटनाधिकारी – आम्! एतत् दिवांग उपत्यकामण्डले स्थितं भीष्मकनगरदुर्गम् । अस्य अवशेषाः तु आर्यकलासंस्कृतिसम्पदः परिचायकाः । अधुना इदं चित्रं पश्यत ।

शैलेशः – अहं जानामि इदं स्थानम् । इदं तु 'तवाङ्गगोम्पा' इति प्रसिद्धः मठः ।

पर्यटनाधिकारी – सम्यक् अभिज्ञातम् । मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अयं बौद्धमठः । पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम् । लौहितजनपदे अपि अनेकबौद्धविहाराः सन्ति ।"

**प्रश्नाः**

I. एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. **1**

दिवांग – उपत्यकामण्डले किं स्थितम् ?

II. पूर्णवाक्येन उत्तरत ।

पूर्णवाक्य में उत्तर दीजिए ।

Answer in a complete sentence. **1**

अनेकबौद्धविहाराः कुत्र सन्ति ?

III. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए ।

Choose and write the correct answer from the given options. **1 × 2 = 2**

(क) 'निवासयोग्या' इतिपदस्य किं विशेष्यपदं नाट्यांशे प्रदत्तम् ?

(i) बौद्धभिक्षूणाम्

(ii) मठः

(iii) स्थली

(iv) सुरम्ये ।

(ख) 'जानामि' इतिक्रियापदस्य कर्तृपदम् अत्र किम् ?

(i) इदम्

(ii) अहम्

(iii) स्थानम्

(iv) चित्रम् ।

12. अधोलिखितयो: कथनयो: समुचितं भावं विकल्पेभ्य: चित्वा लिखत ।

निम्नलिखित कथनों का समुचित भाव विकल्पों में से चुनकर लिखिए ।

Choose and write the correct gist of the following sentences from the given options. **1 × 2 = 2**

(क) 'आपदां तरणि: धैर्यम् ।'

(i) धैर्येण आपद: नौका: इव भवन्ति ।

(ii) यथा नौकासाहाय्येन जना: पारं गच्छन्ति, तथैव धैर्यबलेन जना: आपद्भ्य: तरन्ति ।

(iii) विपत्तौ जन: नदीं तीर्त्वा धैर्यं प्राप्नोति ।

(ख) 'नीरक्षीरविवेके तु हंसो हंस: बको बक: ।'

(i) हंस: क्षीरं पिबति, बक: क्षीरं पिबति ।

(ii) हंसस्य बकस्य च वर्ण: श्वेत: भवति ।

(iii) दुग्धस्य जलस्य च मध्ये किं दुग्धं किं च जलम् ?

इति विवेकपूर्णे कार्ये एव हंसस्य बकस्य च भेदो दृश्यते ।

13. मञ्जूषात: समुचितपदानि चित्वा अधोलिखित-श्लोकद्वयस्य अन्वयं पूरयत ।

मञ्जूषा में से समुचित पद चुनकर निम्नलिखित दोनों श्लोकों के अन्वय को पूर्ण कीजिए ।

Complete the prose order of the following two shlokas by choosing the appropriate words given in the box. **1 × 4 = 4**

(क) "प्रार्थितं ते मया चक्रं देवदानवपूजितम् ।

अजेय: स्यामिति विभो ! सत्यमेतद् ब्रवीमि ते ।।"

अन्वय: – विभो ! अजेय: स्यामिति मया देवदानवपूजितं (i) ______ ते प्रार्थितम् । एतत् ते (ii) ______ ब्रवीमि ।

(ख) "आयुष: क्षणमेकोऽपि न लभ्य: स्वर्णकोटिकै: ।

स चेन्निरर्थकं नीत:, का नु हानिस्ततोऽधिका ।।"

अन्वय: – आयुष: एक: क्षणम् अपि (i) ______ न लभ्य: । स चेत् निरर्थकं (ii) ______ तत: अधिका नु हानि: का ?

**मञ्जूषा**

| |
|---|
| चक्रम्, स्वर्णकोटिकै:, सत्यम्, नीत: । |

14. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।

रेखांकित पदों के आधार पर प्रश्ननिर्माण कीजिए ।

Frame the questions on the basis of the underlined words. **1 × 5 = 5**

(i) विद्वान् <u>सङ्कल्पवाचनं</u> करोति ।

(ii) <u>सहस्रांशु:</u> न भासते ।

(iii) विचित्र: स्वप्न: <u>मया</u> दृष्ट: ।

(iv) <u>मम</u> पिच्छानाम् अपूर्वं सौन्दर्यम् ।

(v) बालका: <u>मार्गे</u> क्रीडन्ति स्म ।

15. अधोलिखितवाक्यानि घटनाक्रमानुसारेण लिखत ।

निम्नलिखित वाक्यों को घटनाक्रम के अनुसार लिखिए ।

Write the following sentences in their sequential order. **½ × 8 = 4**

(i) मित्रद्वयं कुपथेन धनं प्राप्तुं विदेशं गच्छति ।

(ii) सुबुद्धि: प्रच्छन्नभाग्य: कृषिकार्यं कृत्वा श्रमपूर्वकं धनम् अर्जयति ।

(iii) दैववशात् सर्प: दुष्टबुद्धिं दशति ।

(iv) इदं श्रुत्वा दुष्टबुद्धि: शीघ्रमेव तत् क्षेत्रं गच्छति ।

(v) स: अश्वत्थमूलं खनित्वा सुवर्णकलशं प्राप्नोति ।

(vi) इदं ज्ञात्वा दुष्टबुद्धि: चौर्यार्थं तस्य गृहम् अगच्छत् ।

(vii) मार्गे कस्यापि बालकस्य प्रश्नेन समुपजातविवेक: प्रच्छन्नभाग्य: गृहं प्रति गच्छति ।

(viii) तत्र स: प्रच्छन्नभाग्यस्य स्वप्नस्य विषये वार्तां शृणोति यत् तस्य क्षेत्रे एक: सुवर्णपूरितकलश: विद्यते ।

16. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत ।

रेखांकित पदों के प्रसंग के अनुसार अर्थ चुनकर लिखिए ।

Choose and write the contextual meanings of the underlined words. **1 × 3 = 3**

(क) कालस्य कलनस्य आधारः सूर्यः मन्यते ।

(i) जगतः

(ii) गणनायाः

(iii) कोलाहलस्य

(ख) वत्स! न जानाति भवान् द्रौणेः चपलां प्रकृतिम् ।

(i) शब्दमूलम्

(ii) विशिष्टरचनाम्

(iii) स्वभावम्

(ग) अहम् अखण्डः शाश्वतः विभुः ।

(i) नित्यः

(ii) निरन्तरम्

(iii) विचारवान्